श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसुदर्शनषट्कम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसुदर्शनषट्कम् ॥

सहस्रादित्यसङ्काशं सहस्रवदनं प्रभुम्।
सहस्रदं सहस्रारं प्रपद्येऽहं सुदर्शनम्॥ १ ॥

हसन्तं हारकेयूर मुकुटाङ्गदभूषणम्।
भूषणैर्भूषिततनुं प्रपद्येऽहं सुदर्शनम्॥ २ ॥

स्राकारसहितं मन्त्रं पठन्तं शत्रुनिग्रहम्।
सर्वरोगप्रशमनं प्रपद्येऽहं सुदर्शनम्॥ ३ ॥

रणत्किङ्किणिजालेन राक्षसघ्नं महाद्भुतम्।
व्याप्तकेशं विरूपाक्षं प्रपद्येऽहं सुदर्शनम्॥ ४ ॥

हुंकारभैरवं भीमं प्रणतार्तिहरं प्रभुम्।
सर्वपापप्रशमनं प्रपद्येऽहं सुदर्शनम्॥ ५ ॥

फट्कारान्तमनिर्देश्यं महामन्त्रेण संयुतम्।
शुभं प्रसन्नवदनं प्रपद्येऽहं सुदर्शनम्॥ ६ ॥

एतैष्षड्भिस्स्तुतो देवो भगवान् श्रीसुदर्शनः।
रक्षां करोति सर्वात्मा सर्वत्र विजयी भवेत्॥ ७ ॥

॥ इति श्रीसुदर्शनषट्कं संपूर्णं ॥

www.prapatti.com